तृणकुटी, स्त्री, ( तृणाच्छादिता कुटी । ) तृणाच्छादितगृहम् । तत्पर्य्यायः । कायमानम् २ । इति त्रिकाण्डशेषः ॥ तृणौकः ३ । इति हेमचन्द्रः ॥

तृणकूर्म्मः, पुं, ( तृणस्य कूर्म्म इव । ) तुम्बी । इति शब्दमाला ॥

तृणकेतुः, पुं, (तृणेषु केतुर्ध्वज इव । ) वंशः । इति हारावली । १०८ ॥

तृणकेतुकः, पुं, ( तृणकेतु+स्वार्थे कन् । ) वंशः । इति राजनिर्घण्टः ॥

तृणगोधा, स्त्री, ( तृणस्य गोधेव क्षुद्रत्वात् । ) चित्रकोलः । कृकलासः । इति मेदिनी । धे, ४६ ॥ तृणजलौका । इति केचित् ॥

तृणग्रन्थिः, स्त्री, ( तृणस्य ग्रन्थिरिव ग्रन्थिर्यस्य । ) स्वर्णजीवन्ती । इति राजनिर्घण्टः ॥

तृणग्राही, [ न् ] पुं, ( तृणं गृह्णातीति । ग्रह+णिनिः । ) नीलमणिः । इति राजनिर्घण्टः ॥ मणिविशेषः । इति शब्दार्थकल्पतरुः ॥ काफुरदाना इति भाषा । तत्पर्य्यायः । शूकापुष्टः २ तृणमणिः ३ । इति हारावली ॥

तृणजम्भा, [ न् ] त्रि, ( तृणं जम्भो भक्ष्यं यस्य । "जम्भा सुहरितत्तृणसोमेभ्यः ।" ५।४।१२५। इति निपातनात् साधुः । ) तृणभक्षकः । (तृणमिव जम्भो दन्तो यस्य । ) तृणवर्णदन्तयुक्तः । इति सिद्धान्तकौमुदी ॥

तृणता, स्त्री, धनुः । ( तृणस्य भावः । तृण+भावे तल् । ) तृणत्वम् । इति मेदिनी । ते, ११३ ॥

तृणद्रुमः, पुं, ( तृणप्रधानो द्रुमः । तृणमिव द्रुमो वा । ) तालः । गुवाकः । ताली । केतकी । खर्ज्जूरः । खर्ज्जूरी । नारिकेलः । हिन्तालः । एषां निर्य्यासगुणाः । शीतलत्वम् । लघुत्वम् । मोहनत्वम् । बलकारित्वम् । हृद्यत्वम् । तृष्णासन्तापनाशित्वञ्च । इति राजनिर्घण्टः ॥

तृणधान्यं, क्ली, ( तृणबहुलं धान्यम् । ) धान्यविशेषः । उड़िधान इति भाषा । तत्पर्य्यायः । नीवारः २ । इत्यमरः । २ । ९ । २५ ॥

तृणध्वजः, पुं, ( तृणेषु ध्वज इव दीर्घत्वात् । ) वंशः । इत्यमरः । २ । ४ । १६० ॥

तृणनिम्बः, पुं, ( तृणाकारो निम्बः । ) नेपालनिम्बः । इति राजनिर्घण्टः ॥

तृणपत्रिका, स्त्री, ( तृणस्येव पत्रमस्यस्याः । ठन् टाप् च ।) इक्षुदर्भा । इति राजनिर्घण्टः ॥

तृणपत्री, स्त्री, ( तृणमिव पत्रमस्याः । ङीष् । ) गुण्डाशिनी । इति राजनिर्घण्टः ॥

तृणपुष्पं, क्ली, ( तृणस्य पुष्पमिव । ) तृणकुङ्कुमम् । इति राजनिर्घण्टः ॥

तृणपुष्पी, स्त्री, ( तृणमिव पुष्पमस्याः । ङीष् । ) सिन्दूरपुष्पीवृक्षः । इति राजनिर्घण्टः ॥

तृणपूली, स्त्री, ( तृणस्य पूलः संहतिर्यत्र । ततो गौरादित्वात् ङीष् । तृणनिर्म्मितत्वादस्य तथात्वम् ।) चषा । इति हारावली । १६६ ॥ चाँच इति भाषा ॥

तृणमणिः, पुं, ( तृणेषु मणिः । ) तृणग्राही । इति हारावली । २१६ ॥

तृणमत्कुणः, पुं, लग्नकः । इति त्रिकाण्डशेषः ॥ जामिन् इति भाषा ॥

तृणराजः, पुं, ( तृणेषु राजते शोभते इति । राज+अच् । तृणानां राजा वा समासे टच् । ) तालवृक्षः । इत्यमरः । २ । ५ । १६८ ॥ (यथा, आर्य्यासप्तशत्याम् । ५६७ । [लम्बम् ।
"श्रीः श्रीफलेन राज्यं तृणराजेनाप्यवाप्यतो
कुचयोः सम्यक् साम्यात् गतौ घटचक्रवर्त्तित्वम् ॥")
नारिकेलः । इति राजनिर्घण्टः ॥

तृणवल्लजा, स्त्री, (तृणरूपा वल्लजा ।) वल्लजा । इति राजनिर्घण्टः ॥

तृणवीजः, पुं, ( तृणस्य वीजमिव वीजमस्य । ) श्यामाकः । इति रत्नमाला ॥

तृणवीजोत्तमः, पुं, ( तृणवीजेषु उत्तमः । ) श्यामाकः । इति राजनिर्घण्टः ॥

तृणशीतं, क्ली, ( तृणेषु शीतं शीतलम् । ) कत्तृणम् । गन्धतृणम् । इति रत्नमाला ॥

तृणशीता, स्त्री, ( तृणेषु शीता शीतला । ) जलपिप्पली । इति राजनिर्घण्टः ॥

तृणशून्यं, क्ली, ( तृणेन शून्यम् । ) मल्लिका । केतकीफलम् । इति मेदिनी । ये, ११६ ॥ ( एतद्गुणा यथा,—
"नीपं सभार्गवं पीलु तृणशून्यं विकङ्कतम् ।
प्राचीनामलकञ्चैव दोषघ्नं गरहारि च ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥)
तृणरहिते, त्रि ॥

तृणषट्पदः, पुं, ( तृणमिव षट् पदा यस्य । ) वरोलः । इति हारावली । २१७ ॥ बोलता इति भाषा ॥

तृणसारा, स्त्री, ( तृणवत् सारो यस्याः । असारत्वात् तथात्वम् । ) कदली । इति हारावली । १०५ ॥

तृणसिंहः, पुं, (तृणेषु सिंह इव तन्नाशकत्वात् ।) कुठारः । इति शब्दार्थकल्पतरुः ॥

तृणहर्म्म्यः, पुं, ( तृणाच्छादितो हर्म्म्यः । ) तृणयुक्ताट्टालिका । अट्टालिकोपरि तृणनिर्म्मितगृहम् । तत्पर्य्यायः । मयटः २ । इति हारावली । २२३ ॥

तृणाङ्घ्रिपः, पुं, ( तृणरूपोऽङ्घ्रिपो वृक्षः ।) मन्थानकतृणम् । इति राजनिर्घण्टः ॥

तृणाग्निः, पुं, ( तृणजातोऽग्निः । शाकपार्थिववत् समासः । ) तृणजाताग्निः । तत्पर्य्यायः । वत्सलः २ । इति त्रिकाण्डशेषः ॥

तृणाञ्जनः, पुं, ( तृणमिव अञ्जनो व्यक्तो । तृणवदाहृतत्वादस्य तथात्वम् । ) कृकलासः । इति त्रिकाण्डशेषः ॥

तृणाढ्यं, क्ली, ( तृणेषु आढ्यं पुष्टत्वात् ।) पर्व्वततृणम् । इति राजनिर्घण्टः ॥

तृणाम्लं, क्ली, ( तृणेषु अम्लम् । ) लवणतृणम् । इति राजनिर्घण्टः ॥

तृणासृक्, [ ज् ] पुं, ( तृणेषु असृगिव रक्तवर्णत्वात् । ) तृणकुङ्कुमम् । इति राजनिर्घण्टः ॥

तृणेक्षुः, पुं, ( तृणेषु इक्षुरिव । ) वल्लजा । इति राजनिर्घण्टः ॥

तृणोत्तमः, पुं, (तृणेषु उत्तमः ।) उखर्व्वलतृणम् । इति राजनिर्घण्टः ॥

तृणोद्भवः, पुं, ( तृणैः सह उद्भवतीति । उत्+भू+अच् । ) नीवारः । इति राजनिर्घण्टः ॥

तृणौकः, [ स् ] क्ली, ( तृणनिर्म्मितमोकः वसतिस्थानम् । ) कायमानम् । तृणनिर्म्मितगृहम् । इति हेमचन्द्रः । ४ । ६२ ॥ खड़ुया घर इति भाषा ॥

तृणौषधं, क्ली, ( तृणात्मकं औषधम् । ) एलवालुकाख्यगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

तृण्या, स्त्री, ( तृणानां समूहः । "पाशादिभ्यो यः ।" ४ । २ । ४९ । इति यः ।) तृणसमूहः । इत्यमरः । २ । ५ । १६८ ॥

तृतीयः, त्रि, ( त्रयाणां पूरणः । त्रि+"त्रेः सम्प्रसारणञ्च ।" ५ । २ । ५५ । इति तीयः सम्प्रसारणञ्च । ) त्रयाणां पूरणः । इति व्याकरणम् ॥ तेसरा इत्यादि भाषा । ( यथा, मनुः । २ । ३५ ।
"चूड़ाकर्म्म द्विजातीनां सर्व्वेषामेव धर्म्मतः ।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ॥")

तृतीयप्रकृतिः, स्त्री, तृतीया प्रकृतिः । इत्यमरटीकायां भरतः ॥

तृतीया, स्त्री, ( त्रयाणां पूरणी । त्रि+"त्रेः सम्प्रसारणञ्च ।" ५ । २ । ५५ । इति तीयः सम्प्रसारणञ्च । ततष्टाप् । ) तिथिविशेषः । सा चन्द्रमण्डलस्य तृतीयकलाक्रियारूपा तत्क्रियोपलक्षितः कालो वा । इति तिथ्यादितत्त्वम् ॥
अस्यां जातस्य फलं यथा,—
"सकलगुणगभीरो भूमिपालानुरागी
पवनगरविगाही सर्व्वलोकोपकारी ।
परविषयनिवासी कौतुकी सत्यवादी
भवति निखिलविद्यो यस्तृतीयाप्रसूतः ॥"
इति कोष्ठीप्रदीपः ॥
सा वैशाखस्य शुक्ला अक्षयतृतीया । यथा, स्मृतिः ।
"वैशाखे मासि राजेन्द्र ! शुक्लपक्षे तृतीयिका ।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता ॥
तस्यां दानादिकं पुण्यं अक्षयं समुदाहृतम् ॥"
भविष्ये ।
"या शुक्ला कुरुशार्दूल ! वैशाखे मासि वै तिथिः ।
तृतीया साक्षया लोके गीर्व्वाणैरभिवन्दिता ॥
योऽस्यां ददाति करकान् वारिवाजसमन्वितान् ।
स याति पुरुषो वीर ! लोकान् वै हेममालिनः ॥
करकान् कुम्भान् । वाजमन्नम् । हेममालिनः सूर्य्यस्य ॥ ब्रह्मपुराणे ।
"यः पश्यति तृतीयायां कृष्णं चन्दनचर्च्चितम् ।